# শ্রীবুধাষ্টোত্তরশতনামস্তোত্রম্

{॥ শ্রীবুধাষ্টোত্তরশতনামস্তোত্রম্ ॥}

বুধ বীজ মন্ত্র - ওঁ ব্রাঁ ব্রীং ব্রৌং সঃ বুধায নমঃ ॥

বুধো বুধার্চিতঃ সৌম্যঃ সৌম্যচিত্তঃ শুভপ্রদঃ ।
দৃঢব্রতো দৃঢবল শ্রুতিজালপ্রবোধকঃ ॥ ১॥

সত্যবাসঃ সত্যবচা শ্রেযসাম্পতিরব্যযঃ ।
সোমজঃ সুখদঃ শ্রীমান্ সোমবংশপ্রদীপকঃ ॥ ২॥

বেদবিদ্বেদতত্ত্বজ্ঞো বেদান্তজ্ঞানভাস্করঃ ।
বিদ্যাবিচক্ষণ বিদুর্ বিদ্বৎপ্রীতিকরো ঋজঃ ॥ ৩॥

বিশ্বানুকূলসঞ্চারী বিশেষবিনযান্বিতঃ ।
বিবিধাগমসারজ্ঞো বীর্যবান্ বিগতজ্বরঃ ॥ ৪॥

ত্রিবর্গফলদোঽনন্তঃ ত্রিদশাধিপপূজিতঃ ।
বুদ্ধিমান্ বহুশাস্ত্রজ্ঞো বলী বন্ধবিমোচকঃ ॥ ৫॥

বক্রাতিবক্রগমনো বাসবো বসুধাধিপঃ ।
প্রসাদবদনো বন্দ্যো বরেণ্যো বাগ্বিলক্ষণঃ ॥ ৬॥

সত্যবান্ সত্যসংকল্পঃ সত্যবন্ধিঃ সদাদরঃ ।

সর্বরোগপ্রশমনঃ সর্বমৃত্যুনিবারকঃ ॥ ৭॥

বাণিজ্যনিপুণো বশ্যো বাতাংগী বাতরোগহৃত্ ।

স্থূলঃ স্থৈর্যগুণাধ্যক্ষঃ স্থূলসূক্ষ্মাদিকারণঃ ॥ ৮॥

অপ্রকাশঃ প্রকাশাত্মা ঘনো গগনভূষণঃ ।

বিধিস্তুত্যো বিশালাক্ষো বিদ্বজ্জনমনোহরঃ ॥ ৯॥

চারুশীলঃ স্বপ্রকাশো চপলশ্চ জিতেন্দ্রিযঃ ।

উদঽগ্মুখো মখাসক্তো মগধাধিপতির্হরঃ ॥ ১০॥

সৌম্যবৎসরসঞ্জাতঃ সোমপ্রিযকরঃ সুখী ।

সিংহাধিরূঢঃ সর্বজ্ঞঃ শিখিবর্ণঃ শিবংকরঃ ॥ ১১॥

পীতাম্বরো পীতবপুঃ পীতচ্ছত্রধ্বজাংকিতঃ ।

খড্গচর্মধরঃ কার্যকর্তা কলুষহারকঃ ॥ ১২॥

আত্রেযগোত্রজোঽত্যন্তবিনযো বিশ্বপাবনঃ ।

চাম্পেযপুষ্পসংকাশঃ চারণঃ চারুভূষণঃ ॥ ১৩॥

বীতরাগো বীতভযো বিশুদ্ধকনকপ্রভঃ ।

বন্ধুপ্রিযো বন্ধযুক্তো বনমণ্ডলসংশ্রিতঃ ॥ ১৪॥

অর্কেশানপ্রদেষস্থঃ তর্কশাস্ত্রবিশারদঃ ।

প্রশান্তঃ প্রীতিসংযুক্তঃ প্রিযকৃত্ প্রিযভাষণঃ ॥ ১৫॥

মেধাবী মাধবাসক্তো মিথুনাধিপতিঃ সুধীঃ ।

কন্যারাশিপ্রিযঃ কামপ্রদো ঘনফলাশ্রযঃ ॥ ১৬॥

বুধস্যেবম্প্রকারেণ নাম্নামষ্টোত্তরং শতম্ ।

সম্পূজ্য বিধিবৎকর্তা সর্বান্কামানবাপ্নুযাত্ ॥ ১৭॥

॥ ইতি বুধ অষ্টোত্তরশতনামস্তোত্রম্ ॥

Provided by Manda Krishna shrikanth mandaksk at gmail.com

Proofread by KSR Ramachandran ramachandran\—ksr at yahoo.ca

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Budha Ashtottara Shatanama Stotram Lyrics in Bengali PDF
% File name : budha108nAmastotra.itx
% Category : aShTottarashatanAma
% Location : doc_z_misc_navagraha

% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com
% Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Latest update : November 19, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website